# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, नवम्बर/दिसम्बर-२०१६

| | | |
|---|---|---|
| **कक्षा- शास्त्री-२ (SEM-3)** | **प्रश्नपत्र-७** | **गुणाः - ७०** |
| **विषयः- पौरोहित्यम्** | **CE235** | **समयः - ०३ तः ०६** |
| **दिनाङ्कः - ०१/१२/२०१६** | **सन्दर्भग्रन्थः - याज्ञवल्क्यस्मृतिः** | |

**॥ प्रथमान्वितिः ॥**

**प्र-१ निम्नाङ्कितेषु कयोश्चित् द्वयोः ससन्दर्भं व्याख्या विधेया । ०८**

१. छलं निरस्य भूतेन व्यवहारान्नयेन्नृप ।
भूतमप्यनुपन्यस्तं हीयते व्यवहारतः ॥

२. आगमस्तु कृतो येन सोऽभियुक्तस्तमुद्धरेत् ।
न तत्सुतस्तत्सुतो वा भुक्तिस्तत्र गरीयसी ॥

३. लेख्यस्य पृष्ठेऽभिलिखेद्दत्वा दत्त्वर्णिको धनम् ।
धनी वोपगतं दद्यात्स्वहस्तपरिचिह्नितम् ॥

**प्र-२ एकस्मिन् विषये विस्तरेण लिखत । ०८**

१. याज्ञवल्क्यस्मृतेः वैशिष्ट्यं प्रतिपादयत ।

२. यथाशास्त्रं साधारणव्यवहारस्य विषये एकं निबन्धं लिखत ।

**प्र-३ प्रदत्तेषु द्वयोः टिप्पणीं लिखत । ०४**

१. व्यवहारनीतिः ।

२. अभियोगमनिस्तीर्य ।

३. कुर्यात्प्रत्यभियोगः ।

४. बलवद्धर्मशास्त्रमिति ।

**प्र-४ निम्नलिखितेषु केषाञ्चन पञ्चानां लघूत्तरं लेख्यम् । ०५**

१. रसस्य कति गुणाः सन्ति ?

२. व्यवहाराध्यायस्य प्रथमप्रकरणस्य नाम किम् ?

३. व्याहारस्य व्याख्या का ?

४. पूर्वं पूर्वं कः ज्ञेयः ?

५. सभासदसङ्ख्या कति वर्तन्ते ?

६. वस्त्रं कति गुणं प्रोक्तम् ?

**॥ द्वितीयान्वितिः ॥**

**प्र-५ प्रदत्तेषु श्लोकेषु द्वयोः ससन्दर्भं व्याख्या कार्या । ०८**

१. शते दशपला वृद्धिरौर्णे कार्पाससौत्रिके ।
मध्ये पञ्चपला वृद्धिः सूक्ष्मे तु त्रिपला मता ॥

२. मर्यादायाः प्रभदे च सीमातिक्रमणे तथा ।
क्षेत्रस्य हरणे दण्डा अधमोत्तममध्यमाः ॥

३. पितृमातृपतिभ्रातृदत्तमध्यग्युपागतम् ।

आधिवेदनिकाद्यं च स्त्रीधनं परिकीर्तितम् ॥

**प्र-६ कस्याप्येकस्योत्तरं सविस्तरं लिखत । ०८**

१. दिव्यप्रकरणम् ।

२. स्वामिपालविवादप्रकरणम् ।

**प्र-७ अधोलिखितयोरेकस्य टिप्पणी प्रदेया । ०२**

१. कर्तव्यं वचनम् ।

२. एकादशगुणाः ।

**प्र-८ अधोलिखितेषु द्वयोः उत्तरं लिखत । ०२**

१. याज्ञवल्क्यस्य पितुः नाम किम् ?

२. व्यसनं जायते घोरं स शुद्धः स्यान्नसंशयः - अस्यार्थं लिखत ।

३. व्यवहाराध्याये कति प्रकरणानि सन्ति ?

४. व्यवहाराध्यायस्य अष्टमप्रकरणस्य नाम किम् ?

**॥ तृतीयान्वितिः ॥**

**प्र-९ कयोश्चित् द्वयोः ससन्दरर्भं व्याख्या कार्या । ०८**

१. अभक्ष्येण द्विजं दूष्यो दण्ड्य उत्तमसाहसम् ।
मध्यमं क्षत्रियं वैश्यं प्रथमं शुद्रमर्धिकम् ॥

२. जारं चौरेत्यभिवदन्दाप्य पञ्चशतं दमम् ।
उपजीव्यं धनं मुञ्चंस्तदेवाष्टगुणी कृतम् ॥

३. मृताङ्गलग्नविक्रेतुर्गुरोस्ताऽयितुस्तथा ।
राजायानासनारोढुर्दण्ड उत्तमसाहसः ॥

**प्र-१० द्वयोरेकस्य निरूपणं कुरुत । ०८**

१. अशौचप्रकरणस्य महत्त्वं विवेचयत ।

२. आप्तधर्मनिरूपणं कुरुत ।

**प्र-११ अधोलिखितेषु द्वयोः टिप्पणी लेख्या । ०४**

१. उत्तमदण्डः ।

२. यतिधर्मः ।

३. याज्ञवल्क्यस्मृत्यनुसारं वेदानुवचनम् ।

**प्र-१२ अधोलिखितेषु द्वयोः प्रश्नयोः एकैकवाक्येन उत्तरं दीयताम् । ०५**

१. प्रकीर्णप्रकरणे कति श्लोकाः सन्ति ?

२. याज्ञवल्क्यस्मृतौ कति अध्यायाः सन्ति ?

३. प्रकीर्णलक्षणं किमस्ति ?

४. ब्राह्मणस्य शारीरदण्डनिषेधः कथम् ?

५. राज्ञः कोशापहारे को दण्डः ?

६. अपराधविशेषे को दण्डः ?

७. प्रकीर्णप्रकरणं व्यवहाराध्यायस्य कतमं प्रकरणं वर्तते ?